श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे एकविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे एकविंशोऽध्यायः ॥

श्रीशुक उवाच
एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षतो व्याख्यातः ॥ 1 ॥

एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसन्धितम् ॥ 2 ॥

यन्मध्यगतो भगवांस्तपताम्पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्य - शैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमान - स्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ 3 ॥

यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥ 4 ॥

यदा वृश्चिकादिषु पञ्चसु वर्तते तदाहोरात्राणि
विपर्ययाणि भवन्ति ॥ **5** ॥

यावद्दक्षिणायनमहानि वर्धन्ते यावदुदगयनं
रात्रयः ॥ **6** ॥

एवं नव कोटय एकपञ्चाशल्लक्षाणि योजनानां
मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति
तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम
दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं
निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम
तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां
प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण
मेरोश्चतुर्दिशम् ॥ **7** ॥

तत्रत्यानां दिवसमध्यङ्गत एव सदाऽऽदित्यस्तपति
सव्येनाचलं दक्षिणेन करोति ॥ **8** ॥

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति
यत्र क्वचन स्यन्देनाभितपति तस्य हैष
समानसूत्रनिपाते प्रस्वापयति तत्र गतं
न पश्यन्ति ये तं समनुपश्येरन् ॥ **9** ॥

यदा चैन्द्र्याः पुर्याः प्रचलते पञ्चदश -
घटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां
सार्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ **10** ॥

एवं ततो वारुणीं सौम्यामैन्द्रीं च
पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह
ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ॥ **11** ॥

एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्ट -
शताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु
परिवर्तते पुरीषु ॥ 12 ॥

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि
संवत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्धनि
कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं
रविरथचक्रं तैलयन्त्रचक्रवद् भ्रम -
न्मानसोत्तरगिरौ परिभ्रमति ॥ 13 ॥

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन
सम्मितस्तैलयन्त्राक्षवद् ध्रुवे कृतोपरिभागः ॥ 14 ॥

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभाग -
विशालस्तावान् रविरथयुगो यत्र हयाश्छन्दो
नामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ 15 ॥

पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये
कर्मणि किलास्ते ॥ 16 ॥

तथा बालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः
षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय
नियुक्ताः संस्तुवन्ति ॥ 17 ॥

तथान्ये च ऋषयो गन्धर्वाप्सरसो नागा
ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः
सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं
नानानामानं पृथङ्नानानामानः पृथक्कर्म -
भिर्द्वन्द्वश उपासते ॥ 18 ॥

## लक्षोत्तरं सार्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥ 19 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमस्कन्धे ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नाम एकविंशोऽध्यायः ॥